# ३४ चतुस्त्रिंश दशकः - गौतम शापः

स्वर्वासिभि र्गौतम कीर्त्ति रुच्चैः गीता सभासु त्रिदशैः सदेति ।
आकर्ण्य देवर्षि मुखात्कृतघ्ना द्विजा बभूवुः किल सेर्ष्यचित्ताः ॥ ३४-१॥

तैर्माययाऽऽसन्नमृतिः कृता गौः सा प्रेषिता गौतम होमशालाम् ।
अगान्मुने र्जुह्वत एव वह्नौ हुङ्कार मात्रेण पपात चोर्व्याम् ॥ ३४-२॥

हता हता गौरिह गौतमेनेति उच्चै र्द्विजाः प्रोच्य मुनिं निनिन्दुः ।
स चेद्धकोपः प्रलयानलाभः तान् रक्तनेत्रः प्रशपन्नुवाच ॥ ३४-३॥

व्रतेषु यज्ञेषु निवृत्ति शास्त्रेषु अपि द्विजा वो विमुखत्व मस्तु ।
निषिद्ध कर्माचरणे रताः स्त स्त्रियः प्रजा वोऽपि तथा भवन्तु ॥ ३४-४॥

सत्सङ्गमो माऽस्तु जगज्जनन्याः कथामृते वो न रतिः खलु स्यात् ।
पाषण्ड कापालिक वृत्ति पापैः पीडा भवेद्वो नरकेषु नित्यम् ॥ ३४-५॥

उक्त्वैवमार्यो मुनिरेत्य गायत्रि आख्यां कृपार्द्रां भवतीं ननाम ।
त्वमात्थ दुग्धं भुजगाय दत्तं दातुः सदाऽनर्थदमेव विद्धि ॥ ३४-६॥

सदेदृशी कर्मगति र्महर्षे शान्तिं भज स्वं तप एव रक्ष ।
मा कुप्यतामेव मृषि र्निशम्य महानु तापार्द्रमना बभूव ॥ ३४-७॥

शप्ता द्विजा विस्मृत वेदमन्त्रा लब्ध्वा विवेकं मिलिता मुनिं तम् ।
प्राप्ताः प्रसीदेति मुहु र्वदन्तो नत्वा त्रपा नम्र मुखा अतिष्ठन् ॥ ३४-८॥

कृपार्द्र नेत्रो मुनिराह न स्यात् मृषा वचो मे नरके वसेत ।
जायेत विष्णुर्भुवी कृष्णनामा वन्देत तं शाप विमोचनार्थम् ॥ ३४-९॥

स्वपाप मुक्त्यर्थ मनन्त शक्तिं देवीं सदा ध्यायत भक्ति पूताः ।
सर्वत्र भूयाच्छुभ मित्युदीर्य गायत्रि दध्यौ भवतीं महर्षिः ॥ ३४-१०॥

मुञ्चानि मा वाक्शर मन्यचित्ते कृतघ्नता माऽस्तु ममान्तरङ्गे ।
निन्दानि मा सज्जन मेष भीतो भवानि पापाद्वरदे नमस्ते ॥ ३४-११॥